भट्ट सोमदेवविरचित

बृहत्कथासरित्सागरः

नवमलंबकः

पत्र सं० ५६

(प्रथम भागः)

बृहत्कथानवमलंबकप्रारंभः पत्राणि ॥५६॥

११०.

कं॰लं॰९
१

अतःपरमलंकारवतालंबकोनविष्यतिः इदं गुरुगिरीन्द्रजाप्रणयमंदरांदोलनात्पुराकिलकथामृतंहरमुखां
बुधेरुद्गतं प्रसह्यरसयंतियेविगतविघ्नलब्धर्द्धयोधुरंवहंतिवैबुधांभुविभवप्रसादेनते निपुंभभरनम्रो
वीरवचिताःपर्वताअपिः यन्नमंत्रीवन्तत्यंतंनमामस्तंविनायकं एवंवत्सेश्वरसुतःकौशांब्यांभवनेस्थितः वस
न्विद्याधराधीशराज्यंश्रुत्वासविस्मयः नरवाहनदत्तःसकदाचिन्मृगयागतः विवेशगोमुखसखोमुक्तसेनो
महद्वनं सतत्रदक्षिणेनाक्ष्णास्फुरितोक्तशुभागमः दिव्यवीणारवोन्मिश्रमश्रणोद्गीतनिस्वनं गत्वातदनुसा
रेणनातिदूरंददर्शसः स्वयंभ्वायतनंशैवंसंयताश्वोविवेशच तत्रोपवीणयंतांचदेवेशंदेवकन्यकां अपश्य
द्दरकन्याभिर्बह्वीभिःपरिवारितां साहृष्ठातस्यहृदयंप्रसरकांतिनिर्जराः इंदुमूर्तिरिवांभोधेःक्षोभयामासत
ल्लणां सापितंस्मरसंस्निग्धमुखेनालोक्यचक्षुषा तदेकगतचित्ताभूद्विस्मितस्वरसारणा नरवाहनदत्तस्यवि
तज्ञोगोमुखस्ततः केयंकस्यसुताचेतियावत्पृच्छतितंसखी तावच्चसुदृशस्तस्याःस्वर्णहेमारुणप्रभा पश्चाद्दिवा
ततारैकाप्रौढाविद्याधरादिवः साचावतीर्यकन्यायास्तस्याःपार्श्वमुपविशत् कन्याप्युत्थायसातस्याःपादयो
रपततत्तदा सर्वविद्याधराधीशंनिर्विघ्नंपतिमाप्नुहि इतिप्रौढापिसातस्याःकन्यायाआशिषंददौ नरवाहन राम
दत्तोथतामुपेत्यप्रणम्यच दत्ताशिषंपर्य्यपृच्छत्ससांविद्याधरांशनैः केयंकन्याभवत्संबतवकाकथ्यतामिति॥ १

ततो विद्याधरी सा तमुवाच शृणु वच्म्यदः अस्ति गौरीगुरोः शैले श्रीसुंदरपुरं महत् आस्ते लंकारशीलाख्यस्तत्र
विद्याधरेश्वरः तस्योदारगुणा चास्ति महिषी कांचनप्रभा तस्यां तस्य च कालेन राज्ञः सूनुरजायत एष धर्मपरो
भावीत्यादिष्टमुमया यदा स्वप्ने तदा धर्म्मशीलं नाम्ना स व्यकरोत्पिता क्रमेण यौवनप्राप्तं धर्म्मशीलं स तं सुतं
राजा संयोज्य विद्याभिः यौवराज्येभिषिक्तवान् ततः स यौवराज्यस्थो धर्म्मैकपरमो वशी अरंजयद्धर्म्मशीलः पि-
तुरप्यधिकं प्रजाः ततो लंकारशीलस्य राज्ञः सा कांचनप्रभा अंतर्वत्नी सती राज्ञी तस्य सूते स्म कन्यकाः नरवाहनद
त्तस्य भार्य्यैषा चक्रवर्त्तिनः कन्या भवित्रीति तदा दिव्या वागुदघोषयत् ततोत्र तेनालंकारवतीति त्वं तनामकाः
पित्रा क्रमेण ववृद्धिष्ट बाला शशिकलेव सा कालेन यौवनस्था च प्राप्तविद्या निजात्पितुः तत्र दायतनं शंभोः भक्त्या
भ्रमितुमुद्यता तावच्च धर्मशीलोस्य भ्राता शांतो युवापि सन् रहो लंकारशीलं तं पितरं सम्यजिज्ञपत् नमां भो
गा इमे तात प्रीणंति क्षणभंगुराः किं तदस्ति हि संसारे पर्यंतविरसं न यत् तथा चैतत्त्वया किं न श्रुतं व्यासमुनेर्व
चः सर्वे क्षयांता निचयाः पतनांताः समुछ्रयाः संयोगा विप्रयोगांता मरणांतं च जीवितं तदेषु कारतिस्तात नश्व
रेषु मनस्विनां परत्र च सहायां ति न भोगा नार्थसंचयाः एकस्तु बांधवो धर्मो न जहाति पदात्पदं तस्माद्वनाय
गत्वाहं साधयाम्युत्तमं तपः आसादयेयं तद्येन शाश्वतं परमं पदं इत्युक्तवंतं तं पुत्रं धर्मशीलः समाकुलः रा

जालंकारशीलोथवक्तिस्मोदश्रुलोचनः बालस्यैवतवाकांडेकोयंपुत्रमतिभ्रमः उपभुक्तेहितारुण्येप्रशमःस
द्भिरिष्यते तातदारस्वधर्मेणराज्यंपालयतस्तव भोगान्भोक्तुमयंकालोनवैराग्यस्यसांप्रतं एतत्पितृवचश्श्रु
त्वाधर्मशीलोभ्यधात्सुतः नसमासमयोरस्तिनियमोत्रवयस्ततः ईश्वरानुग्रहीतोहिकश्चिद्बालोपिशाम्यति।
वृद्धोपिनशमंयातिकश्चित्कापुरुषःपुनः नचराज्येरतिर्मेस्तिनवादारपरिग्रहे ममतज्जीवितफलंयच्छिवा
राधनंतप इतिब्रुवाणंयत्नेनाप्यनिवार्य्यमवेक्ष्यतं पितालंकारशीलोसौविमुच्याश्रूण्यभाषतः यदियूनोपि
तेपुत्रवैराग्यमिदमादृतं नास्तिवृद्धस्यमेतत्किमहमेवाश्रयेवनं इत्युक्त्वामर्त्यलोकंचगत्वाभागांश्रुतंददौ ब्रा
ह्मणेभ्योदरिद्रेभ्योरत्नानांकांचनस्यच एत्यचस्वपुरीभार्यामवोचकांचनप्रभां त्वयामदाज्ञयैवेहस्थातव्यंनग
रेनिजे रक्ष्यालंकारवत्येषाकन्याशर्णोचवत्सरे अस्तिवैवाहलग्नोस्यास्तिथावष्टतनेशुभः नरवाहनदत्तायदा
स्याम्येतामहंतदा सचक्रवर्त्तीजामाताप्राप्स्यतीदंपुरंचनः इत्युक्त्वादत्तशपथांभार्यांराजानिवर्त्यसः स्वसुतांवि
लपंतींत्वांसपुत्रःशिश्रियेवनं सात्रस्वपुरमध्यास्ततभार्याकांचनप्रभा दुहित्रासहसाध्वीस्वाभर्त्राज्ञांकोहिलं
घयेत् तत्सुताथतयामात्रासहस्नेहानुयातया अलंकारवतीभ्रांतावहून्यायतनानिच एकदातांचवक्तिस्म
विद्याप्रज्ञप्तिसंज्ञका कश्मीरेषुस्वयंभूनिगत्वाक्षेत्राणिपूजय नरवाहनदत्तंहिनिर्विघ्नंतंपतिंततः सर्वविद्या

धरेंद्रैकचक्रवर्त्तिनमाप्स्यसि इत्युक्त्वाविद्ययागत्वाकस्मीरान्मासमातृका अलंकारवतीशंभुंपुण्यपक्षेत्रेष्वसृजयत्॥
नंदिक्षेत्रेमहादेवगिरावमरपर्वते सुरेश्वर्यादिषुतथाविजयेकपरेश्वरे एवमादिषुसंस्रज्यक्षेत्रेषुगिरिजापतिं
विद्याधरेंद्रकन्यासातन्मातावागतेगृहान् तामेतांविध्यलंकारवतींसुभगकंन्यकां तांचमातरमेतस्याविद्धिमां
कांचनप्रभां अद्यचैषाममानुक्त्वैवागतेयंशिवालयं ततःप्रज्ञप्तिविद्यातोविज्ञायाहमिहागता तन्मुखादेववि
ज्ञातस्त्वमपीहागतोमया तदेतांदेवतादिष्टामुपयच्छस्वमेसुतां प्रातश्चसोस्यापित्रोक्तःप्राप्तोवीवाहवासरः तद
घपुत्रकौशांबींस्वामेवनगरींव्रज आवामितश्चगच्छावः प्रातरेत्यतपोवनात् राजालंकारशालस्तेदास्यसेतांसुतां
स्वयं एवंतयोक्तेलंकारवत्यास्तस्याश्चतस्यच नावाहनदत्तस्यकाप्यवस्थावयोरभूत् अन्योन्यरजनीमात्रविश्ले
षासहमात्मनोः चक्राक्लयोरिवासन्नेदिनांतेसाश्रुनेत्रयोः दृष्ट्वातौतादृशौद्वावप्यतादीकांचनप्रभा किमेकरा
त्रिविश्लेषेप्यधैर्ययुतयोरिदं अनिश्चितावधिंधीरास्सहंतेविरहंचिरं श्रूयतांरामभद्रस्यसीतादेव्यास्तथाकथाः॥
राज्ञोदशरथस्यासीदयोध्याधिपतेःसुतः रामोभरतशत्रुघ्नलक्ष्मणानांपुराग्रजः विष्णोरेवावतारांशोरावणोत्साद
नायसः सीतातस्याभवद्भार्याप्राणेशाजनकात्मजा सपित्राभरतन्यस्तराज्येनविधियोगतः प्रेषितोभूद्वनंसाकंसा
तयालक्ष्मणेनचः तत्रतस्याहरत्सीतांमाययारावणःप्रियां निनायचपुरींलंकांपथिहत्वाजटायुषं ततःसरामोवि

वृ॰ल॰र्द
२
3

रहीसुग्रीवंवालिनोवधात् स्वीन्नत्यमारुतिंप्रेष्यतत्प्रवृत्तिमबुध्यत गत्वाचसागरेसेतुंबध्वाहत्वाचरावणं लंकाविभी
षणेन्यस्यसीतांपत्याजहारसः अथाहृतस्यवनतःशासतोभरतार्पितं तस्याराज्यमयोध्यायांशीतागर्भमधत्तसा॥
तावद्वात्रप्रजाचेष्टांज्ञातुंमल्पपरिग्रहः स्वैरंपरिभ्रमन्नेकसोपश्यत्पुरुषंप्रभुः हस्तेगृहीत्वागृहिणींनिरस्यंतंनिजा
द्गृहात् परस्यपंगृहमगादितिदोषानुकीर्तनात् रक्षोगृहोषितासीतारामदेवेननोज्झिता अयमप्यधिकोयोमा
मु— तिज्ञातिवेश्मगां इतितद्गृहिणींवाचंब्रुवतीतन्निजंपतिं रामोराजासमशृश्रावखिन्नश्चाभ्यंतरंययौ लोकाप
वादभीतश्चसीतांतत्याजतांवने सेहेतद्विरहक्लेशंयशस्वीनायशःपुनः सावगर्भालसादैवाद्वाल्मीकेःप्रापचा
श्रमं तेनर्षिणासमाश्वस्यतत्रैवग्राहितास्थितिं नूनंसीतासदोषेयंभर्त्रोत्यक्तावृथाकथं तदेतद्दर्शनान्नित्यंपापं
संक्रामतीहनः वाल्मीकिःलपयाचैतांविश्वासयतिनाश्रमात् एतद्दर्शनजंपापंतपसाचव्यपोहति तदेतद्याव
द्गामोद्वितीयंकंचिदाश्रमं इतिसंमंत्रयामासुस्तत्रान्येमुनयःस्तदा तद्बुध्वातान्सवाल्मीकिरब्रवीन्नात्रसंशयः
शुद्धैषाप्रणिधानेनमयादृष्टाद्विजाइति तथाप्यप्रत्ययस्तेषांयदासीत्तातदाभ्यधात् भगवंतोयथाविश्वतथाऽ
शोधयतेहमां अभ्युद्यायांशिरश्छेदनिग्रहःक्रियतेममः तद्बुद्ध्वाजातकरुणाजगदुर्मुनयोत्रते अस्त्यत्रटिटिभ
नामसरस्तीर्थंमहद्वने टीटिभीहिपुराकापिभर्त्रान्यासंगशंकिताः मिथ्यैवदूषितासाध्वीचक्रंदाशरणाभुवं लो राम २

कपालाश्चतैस्तस्याः शुध्यर्थंतद्विनिर्मितं तत्रैषाराघववधूपरिशुद्धिंकारोतुनः इत्युक्तवद्भिस्तैःसाकंजानकीतत्सरोययौ।
यद्यार्यपुत्रादन्यत्रनस्वप्नेपिमनोममः तदुत्तरेयंसरसःपारमंबवसुंधरे इत्युक्त्वैवप्रविष्टावतस्मिन्सरसिसासती
नीताचपारमुत्संगेतत्वाविर्भूतयाभुवा ततस्तांतेमहासाध्वींप्रणेमुर्मुदयोखिलाः राघवंशप्तुमैवंश्चतत्परित्यागमन्युनाः
युष्माभिरार्यपुत्रस्यनध्यातव्यममंगलं शप्तुमर्हथमामेवपापामंजलिरेषवः इतियद्धारयामाससीतातान्सापतिव्र
ता तेनतेमुनयस्तुष्टास्तस्याःपुत्राशिषंददुः ततःसातत्रतिष्ठंतीसमयेसुषुवेसुतं तंचनाम्नालवंचक्रेसवाल्मीकि
मुनिःशिशुं बालमादायतंतस्यांगतायांस्नातुमेकदाः तेनशून्यंतदुटजंदृष्ट्वासोचिंतयन्मुनिः स्थापयित्वार्भकंया
तिस्नातुंमातत्क्वसोर्भकः नीतःसश्वापदेनेहनूनमन्यंसृजाम्यहं स्नातागतायथासीतानप्राणान्धारयेदिह इतिध्या
त्वाकुशैःतत्वापविचित्रंनिर्ममेर्भकं लवस्यसदृशंतंचसतत्राख्यापयन्मुनिः आगतांतंचसादृष्ट्वामुनिंसीताव्यजिज्ञपत्
स्वकीयोमेस्थितोबालस्तदोषान्यःकृतोमुने तच्छ्रुत्वासयथावृत्तंमुत्क्वामुनिरुवाचतां भवितव्यंगृहाणेतंद्वितीयमनघं
सुतं कुशसंज्ञंमयायंयत्स्वप्रभावात्कुशैःकृतः इत्युक्तातेनमुनिनासातालवकुशौसुतौ तेनैवकृतसंस्कारौवर्द्धयामास
सतत्रतौ बालावेवचतौदिव्यमस्त्रग्राममवापतुः विद्याश्चसर्वावाल्मीकिमुनेःक्षत्रकुमारकौ एकदाचाश्रमम्रगंह
त्वातन्मांसमाशतुः अर्चालिंगंचवाल्मीकेश्चक्रतुःक्रीडनायकं तेनखिन्नोमुनिःसोथसीतादेव्यानुनायितः प्राय

क्षितंतयोरेवमादिदेशकुमारयोः गत्वाकुवेरसरसः स्वर्णपद्मान्यथंलवः तदुद्यानाच्चमंदारान्युग्मान्यानयद्द्रुतं तावेतौ
भ्रातसवेतस्त्रिंगमर्चयतावुभौ तेनैतयोरिदंपापमुपशांतिंगमिष्यति एतच्छ्रुत्वैवकैलासंसवालोपिलवोययौ आ
वस्कंदकुवेरस्यसरश्चोपवनंचतत् निहत्ययक्षानादायपद्मानिकुसुमानिच आगछन्स्वःपथिश्रांतो विश्रामत-
रोस्तले अत्रांतरेचरामस्यनरमेधेसुलक्षणं चिन्वन्तुरगमागछत्तेनमार्गेणलक्ष्मणः सलवंसमराकृतंमोहनास्त्रे
णमोहितं क्षत्रधर्मेणाबध्वातमयोध्यामनयत्पुरीं तावच्चसीतामाश्रमस्थलवानागमदुःखिता वाल्मीकेःस्वाश्रमेत
त्रज्ञाग्नीकुशमभाषतः नीतोयोध्यामवष्टभ्यलक्ष्मणेनलवःसुतः गत्वामोचयतंतस्मादेभिरस्त्रैर्विमोचितात् इत्यु
क्त्वादत्तदिव्यास्त्रस्तेनगत्वाकुशस्ततः योध्यमानेमयोध्यायांयज्ञभूमिंरुरोधसः जिगायलक्ष्मणंचात्रतन्निमित्तं
प्रधावित युद्धेर्दिव्यैर्महास्त्रैस्तैस्ततोरामस्तमभ्यगात् सोपिप्रभावाद्वाल्मीकेर्नोस्त्रैर्जेतुंशशाकतं कुशंयत्नेनप
प्रछकोर्थस्तेकोभवानिति कुशस्ततोब्रवीत्क्रुद्धोलक्ष्मणेनाग्रजोमम आनीतस्तस्याहंमोचनार्थमुपागतः आ
वांकुशलवौरामतनयाविति जानकी मातानौवक्तिचेत्युक्त्वातद्वृत्तांतंशशंससः ततःसवाष्पोरामस्तंकुशमा
नाय्यतावुभौ कंठेजग्राहसैवाहंपापोरामइतिब्रुवं अथसीतांप्रशंसन्सुवीरोपश्यःसुतौशिम् पौरैर्बुमिलिते
ष्वत्रसतौरामोगृहीत्सुतौः आनीयमातांदेवींचवाल्मीकेराश्रमात्ततः तयासहसुखंतस्थौपुत्राभ्यांस्तभरोथसः

एवंसहंतेविरहंधाराग्निमपादृशं नसहेययुवांपुत्रौकथमेकामपिक्षपां इत्यात्मजामलंकारवतींपरिणायोन्मु-
कीं नरवाहनदत्तंचतमुक्ताकीवनप्रभं नभसाप्रातरागंतुमगादादायतांसुतां: नरवाहनदत्तोपिकौशांबीवि
मनाययौ तत्रानिद्रंनिशिस्माहगोमुखस्तंविनोदयन् पृथ्वीरूपकथांदेवशृण्विमांकथयामिते अस्तिनाम्नाप्रति
ष्ठानंनगरंदक्षिणापथे: पृथ्वीरूपाभिधानोभूद्राजातत्रातिरूपवान् तंपरिव्राजिनौजातुश्रमणौद्वावुपेयतुः वि
लोक्याद्भुतरूपंचतावेतौन्टपमूचतु देवावांपृथिवींभ्रांतौनचरूपेणतेसमं अन्यंपुमांसंनारींवादृष्टवंतौक्कचिद्वि
भो किंतुमुक्तपुरद्वीपेराज्ञारूपधरस्यया अस्तिहेमलतादेव्याजातारूपलतासुता सैकातेसदृशीकन्यातस्याश्चै-
कोभवानपि: युवयोर्यदिसंयोगोभवेत्स्यात्सुकृतंततः इतिश्रमणवाक्येनसमंमदनसायका: प्रविश्यश्रुतिमार्गेणराज्ञ
स्तस्यालगन्हृदि ततःसमुत्सुकोराजानिजंचित्रकरोत्तमं कुमारदत्तनामानंपृथ्वीरूपःसमादिशत् पटेयथावल्लि
खितांसमादायमदाकृतिं एताभ्यांसहभिक्षुभ्यांद्वीपंमुक्तिपुरंव्रज तत्ररूपधराख्यस्यराज्ञस्तदुहितुस्तथा युक्त्यारूप
लतायास्तंमदाकारंप्रदर्शय पश्यकिंसन्टपस्तांमेददातितनयांनवा तांचरूपलतांचित्रेलिखित्वात्वमिहानयः ए
वमुक्त्वाभिलेख्यस्वंरूपंचित्रपटेसतं सभिक्षुकंचित्रकरंद्वीपंतस्याहिणोन्नृपः तेचक्रमाच्चित्रकरश्रमणाःप्रस्थिता
स्ततः प्रापुःपौड्रपुरंनामनगरंवारिधेस्तटे ततःप्रवहणारूढागत्वैवांबुधिवर्त्मना तेतंमुक्तिपुरद्वीपमवापुःपंचभि

बृं०कं०९
५
5

र्दिनैः तत्रचित्रकरोगत्वाराजद्वारिसवारिकाम् ममचित्रकरस्तुल्योनान्योस्तीत्युदलंभयत् वद्धुध्वैवसमाहूतोराज्ञा
रूपधरेणसः प्रविश्यराजभवनंतंप्रणम्यव्यजिज्ञपत् पृथ्वीभ्रांत्वामयादेवनदृष्टश्चित्रकृत्समः तद्देवासुरमर्त्यावा
मालिखामिकमादिश तच्छ्रुत्वानाय्यनृपतिः सुतांरूपलतांपुरः इमामालिख्यमत्पुत्रींदर्शयेत्यादिदेशतं ततः कुमा-
रदत्तः सचित्रकृद्राजकन्यकां आलिख्यदर्शयामासतद्रूपामेवतांपटे अथरूपधरोराजातुष्टोमत्वाविचक्षणः एव
तिस्मसतंचित्रकरंजायान्वलिप्सया भद्रपृथ्वीत्वयाभ्रांतातत्कुहियदिक्वचित् रूपेमेदुहितुस्तुल्यादृष्टास्त्रीत्युरु
षोपिवा इत्युक्तस्तेनराज्ञासचित्रकृत्प्रत्युवाचतं नैततुल्यामयादृष्टानारीनाप्यथवापुमान् एकस्तुपृथ्वीरूपाख्यः
प्रतिष्ठानेमहीपतिः दृष्टासमोस्यास्तेनैषायुज्यतेयदिसाधुतत् तुल्यरूपायदानेनतत्प्राप्ताराजकन्यकाः तदानवे
पितारूपायेसतिष्ठत्यपरिग्रहः मयाचदेवदृष्टैवसराजालोचनप्रियः अभिलिख्यपटेसम्यग्गृहीतोरूपकौतुकात्
तच्छ्रुत्वाकिंपटःसोस्तीत्युक्तस्तेनसभूभृता अस्तीत्युक्त्वापटंचित्रकारश्चतमदर्शयत् तत्रदृष्ट्वासतद्रूपंपृथ्वीरूपस्य
भूभृतः राजारूपधरोदध्रेविस्मयाघूर्णितंशिरः जगादचवयंधन्यायेमात्रलिखितोप्ययं दृष्टोराजानमस्तेभ्यः
साक्षात्पश्यंतियेस्वयं एतत्पित्र्ववचःश्रुत्वादृष्ट्वाचित्रेवतंनृपं सोत्कारूपलतानान्यबुभ्रावनददर्शच तांमारमो रामः
हितांदृष्ट्वासुतांसनृपतिस्तदा कुमारदत्तंतंचित्रकारंरूपधरोभ्यधात् नास्त्यालेख्यविसंवादस्तवतद्दुहितुर्मम ५

एतस्याः प्रतिरूपः स पृथ्वीरूपपतिर्नृपः तदेतं मत्सुताचित्रपटं नीत्वा यस्य वरः पृथ्वीरूपनृपायैतां मत्सुतां गत्वा दर्शय
आख्याहि च यथावृत्तं तत्र स्मै यदि रोचते तदितः सुतमायातु परिणेतुं मदात्मजां इत्युक्त्वा स जयित्वार्थैः स्स संप्र
स्थितभिक्षुकं राजा चित्रकरं तं च स्वरूतं च विसृष्टवान् ते गत्वांबुधिमुत्तीर्य चित्रकृद्भिक्षुकाः सर्वे प्रापुः
प्रतिष्ठानं पृथ्वीरूपनृपांतिकं ततः प्राभृतकं दत्त्वा कार्यं तत्र यथातथं सरूपधरसंदेशं तस्मै राज्ञे न्यवेद
यन् स च चित्रकृद् तस्मै भूभृते तामदर्शयत् कुमारदत्तश्चित्रस्थां प्रियां रूपलतां ततः राज्ञस्तस्या वपुष्यस्य
लावण्यसारसीक्षितः मग्ना दृष्टिस्तथा नैतामुद्धर्तुमशकद्यथा स हि कांतिसुधास्यंदमयीं तामर्थयन्नृपः नाह्य
प्यदधिकोकं तः चकोरश्चंद्रिकामिव प्राह चित्रकरं तं च वंद्यो वेधाः करश्चते येनेदं निर्मितं रूपं येन चालिखितं
सखे तद्रूपधरभूपस्य प्रतिपन्नं वचो मया यामि मुक्तापुरद्वीपमुपयच्छे च वः सुतां इत्युक्त्वा चित्रकृद्भिक्षूंस्तं मा
न्यतां धनैः श्वासी च्चित्रपटं पश्यन्पृथ्वीरूपनृपो यस्तः उद्यानादिषु नीत्वा च तद्दिनं विरहातुरः लग्नं निश्चित्य सो
न्येद्युश्चक्रे राजा प्रयाणकं युक्तो विलब्धहस्त्यश्वैस्सामंतै राजसूनुभिः सरूपधरकृतैस्तैश्चित्रकृद्भूमनैश्च सः गजे
ऽमंगलघटं राजारूढय व्रजन्दिनैः प्राप्य विंध्याटवीद्वारं सायं तत्र स्थितोऽभवत् द्वितीयेऽह्नि समारूढ्य शत्रुमर्दरसं
ज्ञकं गजं स्तामब्रवीद्राजा पृथ्वीरूपो विवेश सः यावद्यातिमना तावदग्रयायि निजं बलं पलायमानमाद्रत्तम

कस्मात्तमवलोकयत् किमेतदिति संभ्रांतं तां चाभ्येत्यैव तत्क्षणं राजपुत्रोऽगजारूढो निर्भयाख्योऽभ्यजिज्ञपत् वर्द्दिग्रतो
ति महती भिल्लसेनाभिधावति तैर्वीरगणैः पंचाशन्मत्ताः भिल्लैर्गोऽहता सहस्रं च पदातीनामश्वानां च शतत्रयं युष्म
दीयैश्च भिल्लानां द्विसहस्रं निपातितेः एकोप्यस्मद्बले दृष्टः कबंधो द्वौ च तद्बले ततोस्मत्सैनिका भग्नास्तद्बाणाशनि
पीडिताः तच्छ्रुत्वा कुपितो राजा पृथ्वीरूपः प्रधावसः जघान सेनां भिल्लानां कौरवाणामिवार्जुनः निर्भयादिभिरन्येषु
विद्रुतेष्वथ दस्युषु सचिछेदैकभल्लेन भिल्लसेनापतेः शिरः वानैब्रणगालेदत्तसोभः शत्रुमर्द्दनः सधनुर्निर्ज्जशो
ज्ञारमंदगाडिमवडंबयत् ततो लब्धजयावृत्ते तत्सैन्ये शिथिले विले पलाय्य हतशेषास्ते भिल्लाद्दशदिशो ययुः त
तो निवृत्तसंग्रामः पृथ्वीरूपो महीपतिः सरूपधरहतेनस्तूयमानपराक्रमः श्रांतितानीकविश्रांत्यै तस्यामेवाटवीभुवि॥
विजयी सरसीतीरे दिवसं नयति स्म ततः प्रातस्ततः प्रयातश्च स राजा क्रमशो व्रजन् तत्रापनगरं योद्धपुरं तीरस्थमंबुः
धेः तत्रैकाहं विशश्राम तत्रत्येन महीभृता उदारचरिताख्येन रचितोचितसत्क्रियः तेनैवोपाहृतैर्यानपात्रैस्तीर्त्वा
च सागरं त्र्यष्टभिर्द्दिवसैर्द्वीपं मुक्तिपुरं सतं बुध्वा रूपधरस्तत्र राजाभ्यस्तमभ्यगात् मिलतः स्मयतो भूयो जनकं
गयहो मिथः ततस्तेन समं पृथ्वीरूपो राजा स तत्पुरं विवेश पौरनारीणां पायमानदृवेक्षणैः तत्र हेमलता राज्ञी स च रूप
धरो नृपः दृष्ट्वानुरूपं दुहितुर्भर्त्तारं तं ननंदतु अथ स्वसंपदुचिते राज्ञा रूपधरेण सः आचारो ~चितस्तस्थौ पृथ्वीरूपो

त्रपार्थिवः अन्येद्युश्चचिरोक्तायावेदीमाहत्यशोभने: लग्नेरूपधरपार्श्वःसासवःपाणिमग्रहीत् सत्यंश्रुतंत्वयाश्चर्य-
मितिवक्तुमिवश्रुतिं प्रापोत्फुल्लातयोर्दृष्टिरन्योन्यंरूपदर्शिनोः रत्नानिलाजमोक्षेषुतथारूपधरास्तयोः ददौ-
तथायथासेवमेनेरत्नाकरोजनैः निर्वृतेचसुतोद्वाहेचित्रंतत्र्युमणामतान् संपूज्यवस्त्राभरणैःसर्वानन्यानपूजय
त् ततःपुरेस्थितस्तस्मिन्पृथ्वीपतिर्नयोथसः तद्वीपोचितमाहारंलेभेयानेचसानुगः नृत्तगीतादिभिर्यातेदिनेन-
क्तंविवेशचः सोकारूपलतावासंभवनंसोवनीपतिः आस्तीर्णरत्नपर्यंकंरत्नकुट्टिमशोभितं तत्रमेजेतयासाकंसरू-
पलतयायुवा चिरसंकल्पगुणितंयथेष्टमसुतोस्तवं सुरतश्रमसुप्तश्चपश्चाद्विर्बंदिमागधैः बोधितःप्रातरुत्तस्थौतस्थौ
चंद्रोयथादिविः एवंदशदिनान्यत्रपृथ्वीरूपन्नृपोवसन् दीपेनवनवैर्भोगैर्विलसन्श्वशुराहृतैः एकादशदिनेयुक्त
सहरूपलतयाततः गणकामतेराजाप्रतस्थेत्ततमंगलः तताअनुत्याशःश्वशुरेणसमुद्रतटंचसः वध्वासहप्रवहणान्या
रुरोहानुगान्वितदिनाष्टकेनतीर्त्वाब्धिंतीरस्थेमिलितेबले उदारचरितेचाग्रप्राप्तेपौत्रपुरंययौ तत्रोपवारितस्तेन
राज्ञाविश्रम्यकातिचित् दिनानिसततःप्रायाःपृथ्वीरूपोनभेश्वरः प्रियांरूपलतहस्तिन्यारोप्यजयमंगले कल्याण
गिरिनामानमात्मनारूढ्यचद्विपं सबन्नक्रमादविरतैःसोथराजाप्रयाणकैः उत्पताकाध्वजंप्रापप्रतिष्ठानंनिजंपु
रं तत्ररूपलतांद्रष्टुमासन्पवर्षेपुरांगनाः जगुस्तत्कालमाश्चर्यनिर्निमेषविलोचना राजधानींप्रविश्याथपृथ्वीरूपः

बृं॰लं॰९
७

ततोऽसवः ददौ चित्रतते तस्मै ग्रामान्राजा धनं च सः अमात्योऽह जयित्वा च वसुभिस्तौ यथोचितौ सामंतान्सचिवान्राजा
पुत्रांश्च समानयत् ततस्स रूपलतया प्रियया सहितस्तया जीवलोकसुखं भेजे तत्र पृथ्वीपतिः तती दूत्वा
ख्यायकथां मंत्री गोमुखस्तन्मुखोन्मुखः नरवाहनदत्ताय तमुयाचोत्सुकं पुनः एवं विधस्य ते धीरे स्सल्के शोवि
रहश्चिरं वं पुनः सहसेनैकामपि देव निशां कथं प्रातर्भवानलंकारवतीं हि परिणेष्यति गोमुखेनैवमुक्ते च त-
त्र तत्समयागतः योगंधरायणसुतो मरुभूतिरभाषत अदृष्टस्मरसंतापस्त्वं स्वस्थस्त्वं किं न जल्पसि तावद्धत्ते पुमा
न्धैर्यं विवेकं शीलमेव च यावत्पतति कामस्य सायकानां न गोचरे धन्याः सरस्वतीस्कंदो जिनश्च जगतित्रयः प
टांतलग्नचरणा वह्निसो व्याधूयये स्मरः मरुभूतौ वदत्येवमुद्विग्नं वीक्ष्य गोमुखः नरवाहनदत्तस्तं समर्थ्ययितुमभ्य-
धात् विनोदनार्थमेतन्मे गोमुखो युक्तमुक्तवान् स्निग्धो हि विरहार्या मे साधुवादं ददातु किं समाश्वास्यो यथाशक्ति स्व
जनैर्विरहातुरः अतः परं स जानाति देवश्चासमसायकः इत्यादि जल्पं शृण्वंश्च तास्ताः परिजनान्कथा नरवाहनद
त्तस्तां त्रियामामत्यवाहयत् अथ स प्रातरुत्थाय विहितावश्यकक्रियः गगनादवरोहंतीमपश्यत्कांचनप्रभां तत्रा
लंकारशीलेन धर्मशीलेन सूनुना तयालंकारवत्या च स्वदुहित्रा समन्वितां ते चावतीर्य सर्वे पितसमीपमुपागम-
मन् अभ्यनंदच्च तान्सोपि तं च ते पियथोचितं तावच्च हेमरत्नादि भारवाहाः सहस्रशः अन्येप्यवतरंतिस्म तत्रवि राम ७

द्याधराधिपः विज्ञायैतंच वृत्तांतंवत्सराजःसमंत्रिकः सपत्नीकश्चतत्रागात्तनयोत्कर्षहर्षितः यथार्थविहितातिथ्यंत-
स्मिन्वत्सेश्वरेथसः राजालंकारशीलस्तमुवाचप्रणयानतः राजन्नलंकारवतीकन्येयंतनयामम: जातैचवैषा
व्यादिष्टागगनोक्तयागिरा नरवाहनदत्तस्यभार्यापुत्रस्यसुतस्यते सर्वविद्याधरेंद्राणांभाविनश्चक्रवर्तिनः तदे
तस्मैदास्यतेलग्नोद्यैवानयोःशुभः एतदर्थंमिलित्वाहमेभिःसर्वैरिहागतः एतद्विद्याधरेंद्रस्यतस्यवत्सेश्वरोव
चः महाननुग्रहइतिब्रुवन्नभिनंदसः अथनिजविद्याविभवात्प्राणितलोकोत्पादितेनतोयेन अभ्युक्षिते-
स्मिन्नंगणभूमिंविद्याधराधीशः तत्रोत्पेदेवेदीकनकमयीदिव्यवस्त्रसंछन्ना नानारत्नमयंवाथतत्रिमंकौतुका
गारं उत्तिष्ठलग्नवेलाप्राप्तास्नाहीत्युवाचतदनुवर्ती तंनरवाहनदत्तंराजालंकारशीलोसौ स्नातासकौतु
कमंडतेवेदीमानीयधृतवधूवेशां हृष्टोलंकारवतीसदृशौनिजात्मजांतस्मैः मणिकनकवस्त्रभूषणभारसह
स्राणिदिव्यनारीश्च। अग्नौलाजविसर्गेषुददौचससात्मजोदुहितुः निर्वृत्तेचविवाहेसर्वान्संमान्यतदनुचामंत्र्य:
सहयत्नापुत्रेणचनभसैवयथागतंसययौ अथवीक्ष्यतथोपचर्यमाणांप्रणतैःखेचरराजभिस्तनजं उदयोन्मु
खमत्रवत्सराजोमुदितस्तंचिरमुत्सवंतेतान सचनरवाहनदत्तस्सहृत्तमनोरमामुदारगुणां प्राप्यालंकारवतीवा
णीमिवसुकविरास्ततदुत्सिकः॥।।॥इतिभट्टश्रीसोमदेवविरचितेकथासरित्सागरेअलंकारवतीलंबकेप्रथमस्त

बृ०लं०९
८

रंगः ॥ १ ॥ आदित एकपंचाशस्तरंगः ॥ ५१ ॥ ततोलंकारवत्यासयुक्तोवत्सेश्वरात्मजः नरवाहनदत्तोत्रनववध्वापि
तुर्गृहे तच्चेटिकानांदिव्येनन्नृत्तगीतेनरंजितः आपानंसेवमानश्चसचिवैस्सहतस्थिवान् एकदाचतमागत्यसाश्व-
श्रूः कांचनप्रभा अलंकारवतीमाताविदितातिथ्यमब्रवीत् आगतास्मद्गृहंपश्यतत्सुंदरपुरंपुरं रमस्वतत्रोपवने-
ष्वलंकारवतीयुतः एतच्छ्रुत्वातथेत्युक्त्वापितुरावेद्यतद्गिरा वसंतकंसमादाय वध्वासहसमंत्रिकः श्वश्र्वाविद्याप्र-
भावेणतयैवसविनिर्मितं विमानवरमारुह्यप्रतस्थेव्योमवर्त्मना विमानस्थश्चसगगनात्सौधस्थांस्तत्रविलोक्यतत्
स्थालापरिमितांपृथ्वीसमुद्रपरिखालघुं श्वश्रूभार्यादिभिःस्माकंक्रमात्प्रापहिमाचलं नादितंकिंनरीगीतैःसवधू
संघसुंदरं तत्राश्चर्याणिसुबहून्यथपश्यन्नवाससवान् नरवाहनदत्तोथतत्सुंदरपुरंयुवा सौवर्णरत्ननिचितैःप्रासादै-
र्हिमवत्यपि सुमेरुशिखरभ्रांतिंकुर्वद्भिरुपशोभितं व्योमावतीर्णश्चोत्तीर्यविमानात्सविवेशतं सनाथ्यदर्शनात्सत्य
द्विवलोलैर्ध्वजांशुकैः प्राविशद्राजधानींचसश्वश्र्वात्तमंगला अलंकारवतीयुक्तःसवयस्यवसंतकः तत्रतंदिवसं
भोगैर्दिव्यैःश्वश्रूप्रभावजैः उवासस्तुततीस्वर्गइवश्वशुरवेश्मनि अन्येद्युस्तंचसाश्वश्रूरवोचत्कांचनप्रभा स्वस्तिस्व
यंभूर्भगवानत्रनगरेस्मिन्नुमापतिः सदृष्टस्वर्जितोभोगंमोक्षंचैवप्रयच्छति अलंकारवतीपित्रातत्रोद्यानंततंमहत्
तीर्थंगवासरस्संज्ञमन्वर्थंचावतारितं तत्तत्रार्चयितुंदेवंविहर्तुंचाद्यगच्छतः एवंश्वश्र्वातयोक्तस्तत्रावुद्यानंस- राम
८

हानुगैः नरवाहनदत्तोगादलंकारवतीसखः तत्रभिःकांचनस्कंधैरत्नशाखामनोरमैः मुक्तागुच्छकुसुमैःकांतविद्रु-
मपल्लवैः तत्रगंगासरःस्नातःपूजितोमापतिश्चसः बभ्रामरत्नसोपानवापीःकांचनपंकजाः वासांतीरेषुद्रुमेषुक
ल्पवल्लीगृहेषुचः सहालंकारवत्यासविजहारानुगान्वितः दिव्यैरापानसंगीतैःपरिहासैश्चपेशलैः मत्तभृंगार्ज
वत्तैरमतेस्मचतेषुच मासमात्रमुवासैवंक्रीडन्नुद्यानभूमिषु नरवाहनदत्तोत्रस्वश्च विद्याविभूतिभिः ततो
देवोचितैर्वस्त्रैरलंकारैश्चसज्जितः सवधूकस्सहामात्यःकांचनप्रभयातया आययौसविमानेनतथैवसहसानुगः
कौशांबीसहितोवध्वापित्रोर्दत्तेक्षणोत्सवः तत्रवासवदत्तायावत्सराजस्यचाग्रतः अलंकारवतीमाहमातासाकां
चनप्रभाः दुःखंस्थाप्यस्त्वयाभर्त्तानेर्ष्याकोपेनजातुचित् तत्पापजोहिविरहःपुत्रिगाढानुतापकृत् इर्ष्यावत्याम
यापूर्वंदुःखंयत्स्थापितःपतिः ततोद्यपश्चात्तापेनदह्येतस्मिन्गतेवनः इत्युक्त्वातांसमाश्लिष्यबाष्पसंरुद्धनेत्र-
या कांचनप्रभयाजग्मुःस्वमुत्पत्यनिजंपुरं ततस्तस्मिन्दिनेयातेप्रातःतेवोचिताःक्रियाः नरवाहनदत्तेत्रस्थि
तेस्वसचिवान्विते: अलंकारवतीपार्श्वंप्रविश्यैवविलासिनी एकाब्रवीद्भीतभीतादेवित्रीरक्षरक्षमा एषहिब्रा
ह्मणोहंतुमागतोमांबहिःस्थितः एतद्भयात्प्रविष्टाहंपलाय्यशरणार्थिनी माभैषीर्ब्रूहिवृत्तांतंकोयंकिंत्वांजिघां
सतिः इतिपृष्टाचसावक्तुंभूयएवप्रचक्रमे अशोकमालानामाहमस्यामेवपुरिप्रभो बलसेनाभिधानस्यक्षत्रिय



वृ०कं०९
६

स्वात्मसंभवाः साहंकन्यासतीपूर्वंरूपलुब्धेनयाचिता शगशर्माभिधानेनविप्रेणार्थवतापितुः नाहंदुरात्मनेतिघो
रमुखमिगाम्यहंपतिं दत्तानास्मैगृहेस्थेतिपितरंचाहमब्रुवं तद्बुद्ध्वाप्यकरोत्तावद्यवशर्मासदुर्म्मतिः याचंयाच
रहंदत्तातेनास्मैवधभीरुणाः ततोविवाह्यानिशितामप्यनैषीत्समांद्विजः अहंगतावतंत्यक्त्वाचान्यंक्षत्रियपु
त्रकं सोभिभूतोर्थसंदर्भाद्यन्नेनशगशर्मणाः तद्द्वितीयोमयाक्षत्रकुमारोधनवानुश्रितः तस्यतेनाग्निनारात्रौ
वो१ गवैर्द्दीपितंगृहं ततस्तेनविमुक्ताहंतृतीयंक्षत्रियंगता तस्याप्यादीपितंतेननिशिवेश्मद्विजातिनाः ततस्तेनाप्यहं
त्यक्तासंप्राप्ताकांदिशीकतां जंबुकादविकेवाथबिभ्यतीहंत्रकामतः हगशर्माद्विजात्तस्मात्पदात्पदममुंचतः इहै
वयुष्मद्भृत्यस्यबलिनोवीरवर्मणः राजपुत्रस्यदासीत्वंशरणायस्याहमाश्रयं तद्बुद्ध्वामयिनैराश्यविधुरोविरहातुरः
त्वगस्थिशेषःसंवृत्तोहगशर्मासदुर्म्मतिः मद्रक्षार्थप्रवृत्त—बंधनायेहतस्यसः राजपुत्रोमयादेविवीरवर्मानिम
वारितः अद्यमांनिर्गतांदैवाद्दृष्ट्वातथ्यतपाणिकां हवशर्मासहंतुंमामितोयावत्प्रधावितः तेनागतापलाय्यैवप्र
तीहार्यादयार्द्रया मुक्तद्वाराप्रविष्टाहंसचजानेस्थितोबहिः इत्युक्तवत्यांतस्यांचशवशर्माणमात्मनः नरवाहन
दत्तस्तमग्रमानाययद्द्विजं क्रोधात्शोकमालांतांपश्यंतंदीनयादृशा वितक्षुरिकाहस्तंकोपकंपांपांसंधिकंः
ठवाचचैतंकुब्रह्मन्स्त्रियंहंसिदहस्यपिः तदर्थंपरवेश्मानिकिमर्थंपापकार्यसिः तद्बुद्ध्वासद्विजोवादीद्दुर्मदा राम
६

राइयंममः त्वत्कामांचान्यतोयातिसहेयंतदहंकथं: इत्युक्तेतेनविग्नासाशोकमालातदाब्रवीत् भोलोकपा
लाब्रूतेतत्किंतद्युष्मासुमासाक्षिषु अनिछंतीहठान्नीताविवाह्याहमिहामुना किंतदाचमयानोक्तंनाशिष्ये
स्वगृहेष्विति एवमुक्तेतयातत्रदिव्यावागेवमभ्यधात् यथैवाशोकमालेयंवक्तिसत्यंतथैवतत् नचैषामा
नुषीतत्वमेतदीयंनिशम्यतां अस्त्यशोककरोनामवीरोविद्याधराधिपः तस्याःपुत्रस्यचैकैवदेवादजनिकन्य
का अशोकमालानाम्नासावर्द्धतास्यपितृगृहे यौवनस्थाचसातेनदीयमानान्वयार्थिना: नकंचिदैच्छद्भर्त्ता
रमभिरूपाभिमानतः तेनशापमदात्सोस्यैनिर्बंधकुपितःपिताः मानुषंप्रजनामात्रभवितायस्त्वमेवते परि
णेष्यतिचात्रत्वांविरूपोब्राह्मणोहठात् तंपरस्मात्तद्भयाद्भूयःक्रमेणात्रीनुपैष्यसि ततोप्युपद्रुतातेनदासीत्वे
नाश्रयिष्यसिः राजपुत्रंबलीयांसंनचैवंसनिवर्त्स्यति दृष्ट्वाचयाचितेतस्मिन्नहंत्वत्कामेपलायिताः प्रविष्टारा
जभवनंशापादस्माद्विमोक्ष्यसे एवंयाशोकमालासापित्राविद्याधरीपुरा शप्तातेनैवनामास्यसैषाजातात्रमा
नुषी जातश्चसैषशापांतोमुष्यागत्वाधुनापरः विद्याधरंस्वंतत्रस्वांप्रवेक्ष्यतिनिजांतनुं ततोभिरूपचिताख्येन
विद्याधरमहीभुजा हृतेनभर्त्रासहिताशापंसंस्मरिष्यते इत्युक्तेविरतंवाचादिव्ययासापितत्क्षणं अशोक-
मालासहसागतजावाप्तद्भुविः दृष्ट्वाचतदलंकारवतीबाष्पायतेक्षणा नरवाहनदत्तश्चसपार्श्वस्थोबभूवतुः



वृ०क०९
१०
10

सन्नुदुःखजितामर्षोतिगांधोविलपन्नपि अकस्मादेव शर्माभूद्दृष्ट्वोत्फुल्लाननो द्विजः किमेतदिति पृष्टश्च सर्वै
र्विप्रो जगाद सः मया जन्मस्मृतं पूर्वं तच्च वच्मि निशम्यतां हिमाद्राववस्ति मदनपुरं नामोत्तमं पुरं प्रलंबभु
जइत्यस्ति तत्र विद्याधरेश्वरः तस्योदपद्यत स्थूलभुजाख्यस्तनयः प्रभोः सच राजसुतो भव्यो यौवनस्थो भव
त्क्रमात् ततः सुरभिवत्साख्यो विद्याधरपतिः स्वयं सकन्यो गृहमागत्य प्रलंबभुजमाह तं इयं सुरभिदत्ताख्या
सुता तव सूनवे मया दत्ता स्थूलभुजायाद्य गुणवान्स वहत्विमां तच्छ्रुत्वा प्रतिपद्यैव समाहूय स्वसूनवे स प्रलंबभु
जस्तस्मै एतदर्थं न्यवेदयत् ततः स तत्स्थूलभुजो रूपदर्पात्सुतोऽब्रवीत् परिणेष्येन तातैनां रूपेणैषा हि मध्यमाः
किं पुत्रास्या विरूपेण मान्याद्येषा महान्वया पित्रादत्ता मया चात्रावज्ञे ते मा वृथा तथाः इत्युक्तश्च पुनस्तेन पित्रा
स्थूलभुजस्स तत् नाकरोद्यत तस्तं स शशाप क्रुपितः पिता रूपाहंकारदोषेण मानुष्येव तवामुना भविष्यसि च तत्
त्वं विश्वतो विकटाननः भार्याम शोकमालाख्यां प्राप्य शापच्युतां हृगतः प्राप्तासि विरहक्लेशमनित्वं स्यात्तयो
ज्झितः तस्याश्चान्यप्रसक्तायाः तते दुःखवशीत्ततः करिष्यस्यग्निदाहादि पातकं गागमो हितः इत्युक्ते शापकवतीतं
प्रलंबभुजं तदाः साध्वी सुरभिदत्ता सा पादलग्ना व्यजिज्ञपत् देहि शापं ममाप्येवं मम मास्तु गतिस्तयोः माभून्मे
भर्तुरेकस्य तत्के शो मदयाधतः एवमुक्तवती जघ्नः साध्वीतां परिसान्त्वयन् स प्रलंबभुजः सूनोरेवं शापान्तमभ्य

राम
१०

ध्मात् यदैवाशोकमालायाःशापमोक्षोभविष्यति: तदैव जातिस्मरत्वायं शापादस्माद्विमोक्ष्यते: प्राप्य च स्वतनुं सो
पंविस्मारन्निरहंन्नतिः अचिरात्त्वां विवाह्येह वधुक्तोभविता सुखी: इत्युक्ता तेन सा साध्वी कथंचिद्धृतिमादधे तं च जा-
नीतमांस्थूलभुजं शापादिहच्युतं दृष्टं मया वाहंकारदोषाद्दुःखमिदं महत् पुंसा मदष्टे दृष्टे चाश्रेयोहंकारिणां कुतः
क्षीणोमे स च शापोद्येत्युक्त्वा मुक्त्वा तनुं च तां शवशर्म्मा च संपेदे विद्याधरकुमारकः अशोकमालादेहं च नीत्वा विद्या
प्रभावतः अदृश्यमेवं विक्षेप गंगायामाद्यशंस्पतः विद्याप्रभावानीतैश्च ततोयैरभितः क्षणात् अक्षालयद्दलंका
रवतीवासगृहं सतत् नरवाहनदत्तं च नत्वा तं भाविनं विभुं स्वकार्य्यसिद्धये प्रायादुत्पत्य स नभस्ततः विस्मितेष्वथ
सर्वेषु प्रसंगाद्थ गोमुखः अनंगरतिसंबद्धामिमामकथयत्कथां अस्ति शूरपुरं नाम यथार्थं नगरं भुवि महावरा
हइत्यासीत्तत्र जातत्रारिमर्दनः गौर्य्याराधनतस्तस्यां देव्यां पद्मरतौ सुता यत्नेनंगरतिर्नाम भूयस्यानन्यसंतते कालेन
यौवनारूढा सा च रूपामनस्विनी नैछतिस्म पतिं किंचिद्याचमानेषु राजसु यः शूरो रूपवानेकं विज्ञानं वेत्ति शोभनं
तस्यैमयात्मा दातव्य इत्यवोचत निश्चयात् अथ तत्राययुर्वीराश्चत्वारो दक्षिणापथात् तच्चेप्सवः श्रुतोदंतास्त-
दीप्सितगुणान्विताः द्वास्थेनावेदितांस्तांश्च प्रविष्टान्पृछति स्म सः महावराहो नृपतिरनंगरति संनिधौ नाम-
किं कस्य युष्माकं जाति विज्ञानमेव च: एतद्राजवचः श्रुत्वा तेष्वेकस्तं व्यजिज्ञपत् पंचफुट्टिकनामाहं शूद्रो विज्ञा

बृं०खं०९
११

नमस्तिमे वयामिप्रत्यहंपंचद्रूहिकायुगलानियत् तेभ्यएकंप्रयच्छामिब्राह्मणायददामिवः द्वितीयंपरमेशा
यतृतीयंचवसेस्वयं: चतुर्थंमेभवेद्भार्य्यायदितस्यैददामिततः शरीरयात्रांविक्रीयपंचमेनकरोम्यहं अथ
द्वितीयोप्याचख्यावहंभाषाज्ञसंज्ञकः वैश्योहंतंविजानामिसर्वेषांमृगपक्षिणां ततस्तृतीयोप्यवददहंखड्ग-
धराभिधः क्षत्रियःखड्गयुद्धेनजीवेनान्येनकेनचित् चतुर्थश्चाब्रवीज्जीवदत्तोहंचद्विजोत्तमः गौरीप्रसा
दविद्याभ्यांजीवयामिमृतांस्त्रियं: एवमुक्तवतांतेषांशूद्रविट्क्षत्रियास्त्रयः रूपंशौर्यंबलंचैवशशंसुःस्वय
गात्मनः ब्राह्मणोरूपवर्ज्जंतुबलशौर्य्यंशशंससः ततोमहावराहःस्वंक्षत्तारमवदन्नृपः नीत्वाविश्रामयैतां
स्त्वंसंप्रतिस्वगृहेखिलात्: तच्छ्रुत्वातत्रतथेत्युक्त्वाक्षत्तातामनयद्गृहं ततोब्रवीत्सराजातामनंगरतिमात्मजां
एषांचतुर्णांवीराणांपुत्रिकोभिमतस्तव: श्रुत्वैतत्पितरंतंसाप्याहानंगरतिस्तदा चतुर्णामपिचैतेषांनैकोप्यभि-
मतोममा शूद्रश्चवायकश्चैकः किमयतोस्यकिंगुणैः वैश्योद्वितीयःपश्वादिरुतैर्ज्ञातैश्चतस्यकिं: ताभ्यांकथ
महंदद्यामात्मानंक्षत्रियासती तृतीयस्तुल्यवर्णोमेभवतिक्षत्रियोगुणी: किंतुसेवोपजीवासदरिद्रःप्राण
विक्रयी पृथ्वीपतिसुताभूत्वाकथंस्यांतस्यगेहिनी: चतुर्थोब्राह्मणोजीवदत्तोप्यभिमतोनमे सविरूपोवि
कर्मस्थःपतितोवेदवर्ज्जितः सतेदंडयितुंयुक्तःकिंतुतस्मैददामिमां वर्णाश्रमाणांधर्मस्यत्रातात्वंतातर

राम
११

क्षिता खड्गभृताद्यनृपतेर्द्धर्मभृत्प्रशस्यते खड्गभृत्सहस्राणांधर्मभृत्रोभवेद्यदि इत्याद्युक्तवतीमेतांसुतामंतः
पुरंनिजं विसृज्यचसमुत्तस्थौस्नानाद्यर्थंसभूपतिः द्वितीयेह्निचतेवीराग्रहाद्धूत्तुर्विनिर्गताः बभ्रमुर्नगरेत
त्रचवारोपिसकौतुकाः तावच्चंपकवल्लीनामात्रव्यालवारणः भग्नालानोजनमर्द्दनशालायानिर्गतोब
हिः सोप्यधावच्चतानूदृष्ट्वावीरान्मत्तमहागजः तेचापितस्याभिमुखाःप्रधावन्नुद्यतायुधाः ततःखड्गधराख्योय
स्तन्मध्येक्षत्रियःसतानू अन्यान्निवार्य्यवीनेकोगजमभ्यापपाततं लुलावचकरंतस्यगर्ज्जितोग्रप्रसारितं
एकेनापिप्रहारेणाविसंकटंडावहेलया पादमध्येचनिर्गत्यदर्शयित्वाचलाघवं प्रहारंचददौपृष्ठे द्वितीयंत
स्यदंतिना तृतीयेनचविच्छेदतस्यपादावुभावपि ततोमुक्तारटिर्हस्तीसपपातममारच तंदृष्ट्वाविक्रमंतस्यजा
नःसर्वेविसिस्मिये राजामहावराहस्तद्बुध्वाचिन्तीयतेस्मचः अन्येद्युःसगजारूढोम्रगयायैन्नपोययौ वीराःख
ड्गधराद्यास्तेचवारोपितमन्वयुः तत्रव्याघ्रमृगक्रोडीन्ससैन्योराजन्निघ्नति अधावत्कुपिताःसिंहाःश्रुतवारणबृं
हिताःअभ्यापतंतमेकंचसिंहंखड्गधरोथमः एकेनतीक्ष्णनिस्त्रिंशप्रहारेणाद्विधाकरोत् द्वितीयंसगृहीत्वैवचरणेवा १३
मपाणिनाः आस्फोट्यभुतलेसिंहंचकारगतजीवितं भाषाज्ञोजीवदत्तश्चपंचऊदिकएवच एकैकस्सिंहमेकैकंतथै
वास्फोटयद्भुवि एवंक्रमेणराज्ञस्तेपश्यतःपादचारिभिः लीलयाबहवोवीरैःसिंहव्याघ्रादयोहताः ततःसविस्मयस्तु

वृं०क०९
१२
12

ष्टः त्तता खेटस्स भूपतिः विवेश स्वपुरं तेपि विराः क्षत्रुर्यहंययुः सच राजा प्रविश्यांतःपुरं श्रांतो पितत्क्षणं तत्रैवाचाना
ययामास तामनंगरतिं सुतां आख्यायते बांवीराणामेकैकस्य पराक्रमं आखेटके यथावृत्तं तामुवाचातिविस्मितां।
पंचकृट्टिकभाषाज्ञावसवर्णावुभावपि विप्रोपि जीवदत्तश्चेद्रूपहीनो विकर्मकृत् तद्वन्नियस्य दोषोस्ति तस्य खड्ग-
धरस्यकः शुश्रमाणसुरूपस्य बलविक्रमशालिनः येनहस्ती हतस्ताद्दृग्यः पिनष्टि च भूतले गृहीत्वा पादतः सिंहान्
खड्गेनान्यान्निहंति चः हरिः सेवकश्चेति दोषस्तस्योच्यते यदि अहं तं सेव्यमन्येषां करिष्यामीश्वरं क्षणात् तः तं तं दृष्टणि
स्वभर्त्तारं यजिते पुत्रि ते चतैः इत्युक्ता तेन सानंगरतिः पित्रा जगाद तं तद्यानीतेषु सर्वेषु तेषु वीरेषु विहत्वया गणकः
पृष्ठ्यतां तात वत्स्यत्यामः किं ब्रवीति सः एवं तयोक्तः सन्नृपो वीरानानाय्य तत्र तान् तन्नं निधो सानुरोधः पप्रच्छ गणकं स्वयं।
पश्चानंगरतेषां मध्ये केन समं मिथः अस्यानुकूल्यं लग्नश्च तस्याः स्याच्च कदा शुभः तच्छ्रुत्वाप्य च नक्षत्र स्तेषां स गण-
कोत्तमः गणयित्वा चिरं कालं राजानं तमभाषत नचकुप्यसि मे देव स्फुटं विज्ञापयामि तत् अस्ति त्वद्दुहितुर्नैषां मे-
केनाप्यनुकूलता नचेहास्ति विवाहोस्या एषा शापच्युता त्रयत् विद्याधरी स शापोस्यास्त्रिभिर्मासैर्निवर्त्स्यतिः तस्मान्मा
सत्रयं ता~त्प्रतीक्षस्व तामभीद्दृहः नैषा स्वलोकं याता ता चेत्तत एतद्भविष्यति एतन्मौहूर्त्तिकस्यास्य वचः सर्वेपि ते त्रते श्र राम
द्दधुस्ते च तत्रासन्वीरा मासत्रयं ततः गते मासत्रये राजा तान्वीराणां एकं वदं स्वाग्रमानाययामास तामनंगरतिं च सः। १२

दृष्ट्वाचाधिकसौंदर्य्यमकस्मात्तांसुतांनृपः जहर्षगणकस्तांतुप्रासकालाममन्यत इदानींब्रूहियुक्तंतेहिमासात्र
योगताः इतियावद्वतंराजागणकंपृछतिस्मसः तावजातिंनिजांस्मृत्वासानंगरतिरानने आछायखोत्तरीयेनमा
नुषींतांतनुंजहौ एवमेवस्थितांकिंस्विदितिराज्ञास्वयंमुखं यावदुद्घाट्यतेतस्यास्तावत्सादृदृशेमृता काष्टंत्व
तेत्रभ्रमराविवर्णवदनांबुजा हंसमंजुस्वरोन्मुक्तापद्मिनीवहिमाहता ततःसद्यस्तछोकेवज्रपाताहतोभुविः
भूभृन्यपातनिश्चेष्टस्त्वपक्षछेदमूर्छितः राज्ञीपश्चारतिःसापिव्यामोहंपतितायथौ भ्रष्टाभरणपुष्पाक्षिमिभभग्नेव-
मंजरी मुक्ताक्रंदेपरिजनेतेषुवीरेषुदुःखिषु लब्धसंज्ञःक्षणाद्राजाजीवदत्तमुवाचतं नात्रैषांशक्तिरन्येषामधु
नावसरस्तुतेः प्रतिज्ञातंत्वयानारीजीवयामिमृतामिति यदिविद्याबलंतेस्तितज्जीवयसुतांमम दास्यामितुभ्य
मेवैतांविप्राययासजीवितां इतिराज्ञोवचःश्रुत्वाजीवदत्तोभिमंत्रितैः अभ्युक्ष्यतोयैस्तांमार्य्यपुत्रीभार्य्यामिमां
जहौ अट्टाट्टहासहसितेकरंकमालाकुले दुरालोके चामुंडेविकरालेसाहाय्यंमेकुरुत्वरितं एवंतेनस्तुतेय
नैजीवदत्तेनसायदा बालानजीवितंप्राप्तविषण्णःसोब्रवीत्तदा दत्तापिविंध्यवासिन्याविद्यामेनिष्फलागताः
तदेतेनसहास्येनकिंकार्यंजीवितेनमे इत्युक्त्वादेवदत्तःस्वंशिरश्छेत्तुंमहासिना यावत्प्रवर्त्ततेतावदुदगाद्भारती
दिवः भोजीवदत्तमाकार्षीःसाहसंशृणुसंप्रति एषानंगप्रभानामसताविद्याधरकन्यका पित्रोःशापेनमानु

बृ०कं०९
१२
13

ष्यमियंतंकालमागता त्यक्त्वाद्येतांतनुंयातास्वलोकंस्वतनुंश्रिता: तद्विंध्यवासिनीमेवगत्वाराधयतांपुन: त
त्प्रसादादिमांप्राप्यस्यपिविद्याधरीसती नचैवादिव्यभोगस्थाशोच्याराज्ञोस्यनापिते इत्युदीर्य्ययथातत्वंदिव्या
वाग्विररामसा तत:सुतायाःसंस्कारंत्ववाराजाजहौशुचं: सदारोपिययुस्तेन्येत्वयोवीरायथागतं जीवदत्तस्तु
जातार्त्योगत्वातांविंध्यवासिनीं तपसाराधयामास— म्रेसाव्यादिदेशतं: उष्टातवाहमुक्तिप्रश्रणुचेदंब्रवीमि
ते अस्तिवीरपुरंनामनगरंतुहिनाचले विद्याधराधिराजोस्तिसमरोनामतत्रच: तस्यानंगवतीदेव्यासुतानंगप्र २५
भाजनि: सारूपयौवनोत्सेकान्नैच्छत्किंचितातिंयदा तदातिदुर्ग्रहोत्कुद्धोपितरौशपत:सुतां मानुष्यंव्रजतत्रा
पिनभर्तृसुखमाप्स्यसि: कन्यैवषोडशाब्दांतांत्यक्त्वातनुमिहेष्यसि मर्त्योविरूपभावीत्वत्खड्गसिद्धोयस्तेपति:
मुनिकन्याभिलाषेणाशापान्मानुष्यतांगत: अनिच्छंतीमपित्वांचमर्त्यलोकंसनेष्यसि त्वयातस्यवियोगोत्र
भविष्यत्यविनीतया: सर्वजन्मनितनाष्टोहृताहिपरायोषित: तेनाष्टजन्मभोगार्हदु:खंसोनुभविष्यति: त्वं
चात्रजन्मन्येकस्मिन्नष्टानामिवजन्मनां दु:खंप्राप्स्यसिविद्यानांभ्रंशेनमनुजीत्वता सर्वस्यैवहिपापिष्टसंप
र्क:पापभागद: समपाप:पुनस्त्रीणांभर्त्रापिपापेनसंगम: नष्टस्मृतिर्वहूंश्चात्रपतीन्प्राप्स्यसिमानुषान् त्व
योचितवराद्वेषविग्रहोविहितोयत: योयाचतसमानस्त्वांसुचरोमनेप्रभ: भूत्वासमानुषोभूमरदंतेभावीय राम १२

तिस्तव ततस्त्वंशापनिर्मुक्तास्वलोकंपुनरागता तमेवबधुचरीभूतंसंप्राप्स्यसुचितंपतिं तदेवंपित्रशासासाभूता
नंगरतिःक्षितौ प्राप्तास्यपित्रोर्निकटजातानंगप्रभापुना अतोवीरपुरंराज्ञाजित्वाततस्त्वितरंगणेः जानंतमपिकौ
लीनरक्षिणांतामवाप्नुहि इमंगृहाणखड्गंचयेनहस्तगतेनते गतिर्भविष्यत्याकाशेकिंचाजेयोभविष्यसि इत्यु
क्त्वार्पितखड्गासातस्यदेवीतिरोदधे सचप्रबुधेदिव्यंखड्गंहस्तेददर्शच अथोत्थायसहृष्टात्माजीवदत्तोर्चितां
विकाः तत्प्रसादामृताप्यायशांताशेषतपःक्लमः खड्गहस्तःखमुत्पत्यपरिभ्रम्यहिमालयं प्राप्यवीरपुरस्थितंस
मरंधुचरेश्वरं तेनयुद्धजितेनाथप्रदत्तांपरिणीयसः तामनंगप्रभांभेजेदिव्यांसंभोगसंपदं किंचित्कालंस्थितः
श्वावश्वशुरंसमरंसतः जीवदत्तोजगादैवतांचानंगप्रभांप्रियां मनुष्यलोकंगगमस्तंप्रत्युक्तेतिस्मियतूः प्रा
णिनांहिनितनष्टापिजन्मभूमिःपराप्रियां एतच्छुत्वावचस्तस्यश्वशुरःसोन्वमन्यतः साचानंगप्रभातत्रवारदनुमेन्ये
विजानती अथांकोपात्तयात्साकमनंगप्रभयातया जीवदत्तःसनभसासमर्त्यलोकमवातरत् दृष्ट्वाचाम्यमे
कंचपर्वतंसाजगाददतं श्रांतानंगप्रभाक्षिप्रमिहविश्राम्यतामिति ततस्तथेतितत्रैवसोवतीर्य्यतयासह चका
राहारपानादितत्रद्धिघाप्रभावजं ततोनंगप्रभाजीवदत्तोसौविधिवोदितः तामुवाचप्रियेकिंचिन्मधुरंगायन
तांत्वया तच्छुत्वागातुमारेभेसाभक्त्याधूर्जटेस्तुतिं तेनतज्जातशब्देनसोथनिद्रामगाद्द्विजः तावदास्वैटिकश्रां

तोनिर्जरांभोभिलाषुकः राजाहरिवरोनामपथातेनकिलाययौ सतेनगीतशब्देनश्रुतेनहरिणोयथा आकृ
ष्टोभ्यापतत्तत्र प्राणानुन्मुच्यकेवलः शकुनैःसर्वमाख्यातशुभोपश्यत्सभूपतिः तामनंगप्रभांसत्यां अनंगस्यप्र
भामिव तद्गीतरूपाभ्यांनीतंतस्यविहस्ततां निर्बिभेदयथाकामंहृदयंमदनःशरैः सापितंवीक्ष्यसहसासु
भगंपुष्पधन्वनः पतितागोचरोसाप्रभाक्षणमचिंतयत् कोयंकिमयमुन्मुक्तपुष्पचापोमनोभवः किं
मूर्तोगीततुष्टस्यशर्वस्यानुग्रहोमयि इतिसंचिंत्यपप्रच्छसातंमदनमोहिता कस्त्वंकथंवनंचेदमागतोस्युच्यता
मिति ततोयथागतोयःसमसर्वतस्यैशशंसतत् सराजातामथापृच्छकैत्वंसुंदरिशंसमेः व्यञुसुसस्थितात्रा
यमेषकःकमलानने इतितंपृष्टवंतंचसंक्षिप्येणजगादसाः अहंविद्याधरीखड्गसिद्धश्चैषपतिर्मम दृष्टमात्रे
पिजातास्मिसानुरागाधुनात्वयि तदेहितावदूरावस्त्वदीयंनगरंद्रुतं यावत्प्रबुध्यतेनायंतत्रवक्ष्यामिविस्तरात्।
श्रुत्वैतत्तद्वचोराज्यप्रतिपद्यवथेतिसः त्रैलोक्यराज्यसंपत्तिहर्षंहरिवरोदधौ नृपमंकेगृहीत्वैमंगगणमुत्पत्यत
विजवात् इत्यनंगप्रभासांतःसत्वरासममचिंतयत् तावच्चभ्रष्टविद्यातद्भर्तृद्रोहेणचेतसा स्मरंतीपितृशापंच
विषादंसहसाययौ तद्दृष्ट्वाकारणंपृष्टासराजातामभाषत नविषादस्यकालोयंप्रबुध्येतैषतेपतिः दैवायत्तं राम
चवस्त्वेतद्गोचिनुनार्हसिप्रिये कोहिस्वशिरसःछायांविधेश्चोलंघयेद्धृतिं तदेहियामइत्युक्त्वातांसमाश्वसित १४

तद्गिरिं अंकेहरिवराश्वकेराजानंगप्रभांद्रुतं ततोनिधनंलक्षैवत्र्युष्टोगवाजवात्ततः राजास्ववोहस्वार्थसभ्य
त्यैरभिनंदितः तेनस्वनगरंप्राप्यसमनशीघ्रगामिना रथेनरमणीयुक्तैःप्रजानांदत्तकौतुकः स्वनामलांछने
तस्मिन्सोनंगप्रभयातया सहदिव्यसुखस्तस्थौततोहरिवरोन्टपः साप्यनंगप्रभातत्रैवासीत्तदनुरागिणी वि
स्मृत्यस्वप्रभावंतंसर्वेशापाविमोहिताः अत्रांतरेसतत्रात्रौजीवदत्तोनकेवलं प्रबुद्धोनैक्षतानंगप्रभांयावस्व
मप्यसि क्वसानंगप्रभाकष्टंक्वसखड्गोपिकिंनुतत् हृतावागता सा किंवातौनीतौद्वावपिकेनचित् इत्यु
द्भ्रांतोबहूनूर्ध्वान्वितक्रोशदिनत्रयं गिरिंतंविचिनोतिस्मदह्यमानःस्मराग्निना ततोवतीर्यचिन्वानोव
नानिदिवसान्दश सबभ्रामनचापश्यत्तस्याःपादमपिक्वचित् हादुर्जनविधेत्वद्वात्सादवापिकथंवयाः स्व
द्गसिध्यसहहृताप्रियानंगप्रभामम इत्याक्रंदन्निराहारोभ्रमन्नेकमवाप्तवान् ग्रामंतत्रविवेशैकमाढ्यं
द्विजगृहंवसः गृहिणीतत्रसुभगासुवस्त्रावोपवेश्यतं आसनेप्रियदत्ताख्यस्वचेटीःशीघ्रमादिशत् व्रती
तंजीवदत्तस्यपादौक्षालयतास्यहि निराहारस्यविरहाद्दिनमद्यत्रयोदशं तच्छ्रुत्वाजीवदत्तोंतर्विस्मितोवि
ममर्शचइहानंगप्रभाप्राप्तासाकिंकिमेषांचयोगिनी इतिध्यायन्नधौतपादोभुक्तेतदत्तभोजनः प्रणतःप्रि
यदत्तांतामभ्येत्याप्रच्छतिस्मसः एकंब्रूहिकथंवेत्सिमद्वृत्तांतमनिंदिते द्वितीयंचापिकथयखड्गोपक्वमेग

तौः तच्छ्रुत्वा तमवोचत्सा प्रियदत्ता पतिव्रता भर्तुरन्यो न मे चित्ते स्वप्नेपि क्रुद्ध ते पदं पुत्र भ्रातृसमानन्यान्पश्या
मि पुरुषानहं नव मेऽनर्चितो यातिकदाचिद तिथिर्गृहात् तत्प्रभावेन जानामि भूतं भव्यं च भाविचः साचानंग
प्रभानीता राज्ञा हरिवरेण तैः सुसेव्य यिविधैर्योगा स्वमार्गगामिना तदा गीता त्वष्टोपयाते न स्वनाम पुरवासिनाः
सा च शक्या न ते प्राप्तुं सहिराजा महाबल सायुनस्तमपित्यक्त्वा कुलटान्यत्र यास्यति त्वं च देवी प्रादात्तेन तत्प्राप्त्यै तद्वि
धायसः तस्यां हृतयां दिव्यव्रताद्देव्या एवांतिकं गतः किं च देव्यैव नेनंगप्रभाशाया पवर्णाने स्वप्ने भावियदादिष्टं
तत्कथं विस्मृतं तव तदेषभवितव्येर्थे व्यामोहस्तेद्य यैवकः पापानुबंधं मुंचेमं भूयो भूयोति दुःखदं किं वाधुना
तव तया पापया न्यानुरक्तया मानुषीभूतया भ्रातस्त्वद्द्रोह भ्रष्टविद्यया इत्युक्तः सतया साध्व्या त्यक्त्वानंगप्रभा
स्पृहः तत्रापल्लविरक्तात्मा जीवदत्तो जगाद तां शांतस्तद्य च सा मोहः सत्येनांबामुनामम कामं न श्रेयसे कं
स्यसंगमः पुण्यकर्मभि सर्वपापवशादेतद्दुःखमापतितं मम तच्छमनाय यास्यामि तीर्थान्युज्जितमत्सरः कामेनं
गप्रभादेतो वैरेणार्थः परैः सह जितक्रोधेन सर्वे हि जगदेतद्विजीयते इति यावत्स वक्त्यत्र तावत्तस्याः पतिगृहे
न्नाययौ प्रियदत्ताया धार्मिको तिथिवत्सलः तत्रातिथ्येन तेनापि त्याजितो दुःखमत्रसः विश्रम्य तीर्थयात्रायै
प्रायाद्वाप्रब्यतावुभौ ततः क्रमेणतीर्थानि श्रद्धयां स्वर्वाणि सोभ्रमतः विसोढानेककांतारकष्टो मूलफलाशनः

भ्रांत तीर्थश्चतामेव सययौ विंध्यवासिनीं तत्र ते पेतपस्तीव्रं निराहाराः कृशास्ततो तपस्तुष्टा च सा साक्षादुवाचैनां-
तमं विकाः उत्तिष्ठ पुत्रयूयं हि चत्वारो मामका गणाः पंचमूल चतुर्वक्त्र महोदर मुखास्त्रयः त्वं चतुर्थश्च विकटव
दनाख्यो गणोत्तमः ते यूयं जातु गंगायां विहर्तुं पुलिनं गता तत्रस्तां तीचयुष्माभिर्दृष्टैकामुनिकन्यका चाप
लेखेति कपिलजटाख्यस्य मुनेस्सुता प्रार्थ्यते स्म च सर्वैः सा भवद्भिर्मदनातुरैः कन्याहमपयातेति तयोक्ते तेत्रयो
परे तूष्णीमासंस्त्वया सा तु हठगृह्याहावगृह्यत क्रंदति स्म च सा तात तात त्रायस्व मामिति तच्छ्रुत्वा निकटस्थोत्र स-
क्रुद्धो मुनिरागमत् तं दृष्ट्वा सा त्वया मुक्ता ततो युष्मांश्च शापसः मनुष्ययोनिं पापिष्ठाः सर्वे यातेति तत्क्षणं प्रार्थितः
सोथ शापांतमेवं वो मुनिरभ्यधात् यदा नंगवती राजासुता युष्माभिरर्थिता गता वैद्याधरं लोकं मोक्ष्यध्वमीत
दास्त्रयः त्वं तु विद्याधरीभूतां प्राप्य तां हारयिष्यसि ततः प्राप्स्यसि विकटवदन व्यसनं महत् चिराच्च देवीमाराध्य शापाद
स्मादिमोक्ष्यसे त्वयास्याश्चापलेखायाहस्तस्पर्शो यतस्ततः परदारापहारोत्थं पापमस्ति च ते बहु इति ये मद्गणास्त्रयः शप्ता
स्तेन महर्षिणा ते य जाताश्चत्वारः प्रवीरा दक्षिणापथे पंचऊदिकमाषाङ्गो यो तौ खड्गधरश्चयः सखायस्ते त्रयस्त्वं तु
चतुर्थो जीवदत्तक ते च त्रयो नगरतो प्रयाता तायां निजं पदं इहागत्यैव निर्मुक्ता मत्प्रसादेन शापतः त्वया चाराधिता
स्म्यद्य तत शापक्षयश्चते तदाग्नेयीं गृहीत्वेमां धारणां स्वतनुं त्यज अच्छजन्मोपभोग्यं च यातकं तत्सत्त्वं दह इत्युक्त्वाधा

दृ०ल्क०८
१६
16

रणां दृष्ट्वा देवी तस्य तिरोदधे समर्त्यदेहं यापं च वद्गृह्य धारणं याततया जीवदत्तश्चित्राछापमुक्तो जज्ञे गणोत्तमः देवानां-
मप्यहो येन सुमहानू क्लेश एव सः पात्रस्त्रीसंगमो ळे नहा हान्येषां तु का गतिः एवं च स तत्र सानंगप्रभा हरिवरे पुरे राज्ञो
हरिवरस्यांतःपुराणां प्राप्य मुख्यतां स च राजा तदेकाग्रमनास्तस्थौ दिवानिशं स्वमंत्रिणि सुमंत्रे च राज्यन्यस्तराज्यमहा-
भरः एकदा तस्य राज्ञश्च निकटं मध्यदेशतः आगाल्लब्धवरो नाम नाट्याचार्यो नवः ततः स दृष्टकौशलस्तेन भूभृ-
ता वाद्यनाट्ययोः संमान्यांतःपुरस्त्रीणां नृत्ताचार्यो व्यधीयत तेनानंगप्रभा नृत्ते प्रकर्षं प्रापिता तथा नृत्यत्यपि
सपत्नीनां स्पृहणीया भवेद्यथा सहवासश्च तस्याश्च नृत्तशिक्षारसादपि नाट्याचार्यस्य चानंगप्रभाभूदनुरागि-
णी तस्याश्च रूपनृत्ताभ्यामात्तचेतसः शनैरहो नाट्याचार्योऽपि कामेन किमर्थं तानृत्यत विजने चैकदानंगप्रभा
सा नाट्यवेश्मनि प्रसह्य नाट्याचार्यं तमुपागाद्रतलालसा सुरतांते च सा त्यक्तं सानुरागा जगाद तं त्वया विना धु-
नाहं स्थातुं शक्नोम्यपि क्षणं राजा हरिवरश्चैतद्बुध्वा नैव क्षमिष्यते तदेह्यन्यत्र गच्छामो यत्र राजा त बुध्यते अस्ति
हेममयो भूरिदं धनं च तव भूभृता नाट्यतुष्टेन यद्दत्तमस्ति चाभरणं मम तत्तत्र व्रजितं यामस्तत्र स्थामो यत्र निर्भयाः।
एतत्सतद्वचो हृष्टो नाट्याचार्योऽन्वमन्यत ततः पुरुषवेषं सा तत्त्वानंगप्रभा ययौ नाट्याचार्यगृहं वेद्यां सह सुत्रि-
ग्ध्ययैकया ततस्तद्वै वतेनो श्रुप्यष्टार्पितधनर्द्धिना साकं सा तुरगारूढा प्रायान्नाट्योपदेशिना आदौ वैद्याधरी ल

राम
१६

क्ष्मीत्यक्त्वा राजश्रियं पुनः शिश्रिये चारणर्द्धिं साधिकृत्स्त्रीणां चपलं मनः गत्वा च नाद्याचार्येण रतनानंगप्रभा सह दूरं सा-
नगां प्राप वियोगपुरसंज्ञकं तत्र तत्सहितां स्थितो सुखं सा सोपि लब्धया तया लब्धधवा स्वां स्वां सत्यां सेने नदाग्रणीः तावच्च
तां गतां क्वापि बुद्ध्वानंगप्रभां प्रियां राजा हरिवरः सोभूद्दहव्याग्येवमुखशुचा ततः सुमंत्रो मंत्रीतमुवाचाश्वासयन्नृपं ।
देव किं नानुवेत्सि त्वं पर्यालोचय तत्स्वयं खड्गविद्याधरं त्यक्त्वा पतिं वां दृष्टमेवयाः उपाश्रिता कथं तस्याः स्थैर्यं स्याच्च
य्यपि प्रभो लब्धुं किः चिंडही वा सौगता सद्वस्तु निस्पृहाः तृणारत्नशलाकेव तृणादप्यनुरागतः नाद्याचार्येण सा नूनं-
नीता सचनदृश्यते संगीतकगृहे प्रातस्तौ स्थितौ इति वश्रुतं तद्देववदकस्तस्यां जानतोपितवग्रहः विलासिनी हि स-
र्वस्य संध्येव क्षणरागिणी इत्युक्त्वा मंत्रिणा सोथ विचारपतितोन्नृपः अचिंतयदहो सत्यमुक्तं मे सुधियामुना पर्यंत
विरसा कष्टा प्रतिक्षणविवर्तिनी भवस्थितिरिवानित्यसंबंधा हि विलासिनीः पतितं मज्जयंती सुदर्शितोत्कलिका सुचः
प्राज्ञः पतत्यगाधासु तुच्छस्त्रीषु च नदीषु च व्यसनेषु निरुद्वेगा विभवेष्वव्यगर्विताः भयेष्वकातराये च ते धीरास्तैर्जितं ज-
गत्ः इत्यालोच्य शुचं त्यक्त्वा नं त्रिणां वचनेन साः स्वदारेष्वेव संतोषं राजा हरिवरोव्यधात् साप्यनंगप्रभा तत्र वियोग
पुरनामनि नाद्याचार्ययुता यावत्किंचित्कालं स्थिता पुरेः तावत्तस्यात्र संजज्ञे नाद्याचार्यस्य दैवतः यूना सुदर्शनेना-
त्र द्यूतकारेण संगतिः तेन द्यूतहृताशेषधनो नंगप्रभाग्रतः ततः सुदर्शनेनात्र नाद्याचार्यो चिरेणसः तद्रोधादि-

बृं०क्रे०८
१७
17

वनिश्रीकंत्यक्त्वानंगप्रभाथतः सासुदर्शनमेवैतंप्रसह्याशिश्रियत्पतिं नष्टदाराधनःसोथनाथाचार्योप्रतिश्रयः
वैराग्यात्तपसेबद्धजटोगंगातटंययौ साप्यनंगप्रभातेनद्यूतकारेणसंगता सुदर्शनेनतत्रैवतस्थौनवनवप्रिया
एकदासपतिस्तस्यास्तस्करैश्चसुदर्शनः मुषिताशेषसर्वस्वःप्रविश्यराजनीत्ततः ततस्तांद्रविणाभावदुःस्थितामनुता
पिनीः दृष्ट्वासुदर्शनोनंगप्रभामिदमुवाचसः हिरण्यगुप्तनामायःसुहृन्मेस्तिमहावणिक् तत्सकाशाद्धनांकिंचिदे
ह्यधमर्गयामहेः इत्युक्त्वादैवहतधीस्तगत्वैवतयासह तूर्णांहिरण्यगुप्तंतंवणिग्मुख्यमयाचत: सावानंगप्रभांदृष्ट्वाव-
णिक्साप्यपिचतंतदा अन्योन्यसाभिलाषौतौबभूवतुरुभावपिः ऊचावचैवंसवणित्तंसुदर्शनमादरात् प्रातर्दास्येहि
रण्यंवामद्यैहैववत्तुभुज्यतां तत्श्रुत्वान्यादृशंभावमुपलक्ष्यतयोर्द्वयोः सुदर्शनोब्रवीन्नाहंभोजनेप्यपदुःस्थितः वणि
क्पतिस्ततोवादीत्तर्हित्वद्वनितासखेः भुक्त्वाप्रथममस्माकमेषाहिगृहमागता इत्युक्तस्तेनतूष्णींसबभूवकितवोपि
सन् सचानंगप्रभायुक्तोययावभ्यंतरेवणिक् तत्रचक्रेतयासाकंपानाहारादिनिर्वृतं अतर्कितोपनतयालसन्मद
विलासया सुदर्शनःसतस्याश्चनिर्गमंप्रतिपालयन् वहिस्थितसततद्भृत्यैर्हृचेतत्योरितैस्ततः भुक्त्वागृहगतासेतिनि-
र्यातीनत्वयेक्षिताः तत्वयापिकिमद्यापिक्रियतेगम्यतामिति सांतस्थितानर्निर्यातानयास्यामीतिसोब्रवीत् द्वा
पादप्रहारांस्तैस्तद्भृत्यैर्निरकाल्यत ततःसुदर्शनोगत्वादुःखितःसमचिंतयत् कथंमेवणिजादात्तमित्त्रेणाप्यमुनाहृताः।

राम
१७

इहैवोपनतंवामेस्वपापफलमीदृशं यन्मयात्ततमन्यस्यतद्दिनेनत्तंममः कुप्यामिकिंतदन्यस्मैकोपार्हयस्वक
र्ममे तद्भिन्नभिन्नयेनस्यात्पुनर्ममपराभवः इत्यालोच्यक्रुधंत्यक्त्वागत्वाबदरिकाश्रमं धृतकारस्तदातत्रभव-
द्देहमधात्तपः साचरूपाधिकंप्राप्यप्रियंतंवणिजंपतिं रेमेनंगप्रभाभृंगीपुष्पात्पुष्पमिवागता क्रमेणतस्यसा-
चाभूद्वणिजोविपुलश्रियः स्वामिनीसानुरागस्यप्राणेष्वपिधनेष्वपि राजाचवीरबाहुश्चतत्रस्थामेकसुंदरी बुध्वा
पिधर्ममर्य्यादांरक्षन्नैवजहारतां दिनेषतव्ययैःसोभूद्वणिगल्मीभवद्धनः म्लायतिश्रीकुलस्त्रीवगृहेबंधक्यधिष्ठि
तेः ततःसुवर्णभूम्याख्यंद्वीपंसंभृतभांडकः हिरण्यगुप्तःसवणिक्प्रस्थितोभूद्वणिज्यया: वियोगभीत्याचादाय-
तामनंगप्रभासह व्रजन्पथिक्रमात्प्रापसमासन्नपुरंपुरं तत्रसागरवीराख्योवास्तव्योधीवराधिपः नगराभोधिनि-
कटेतस्यैकोमिलितोभवत् तेनाध्विजीविनासाकंसोथ्यगत्वांबुधेस्तटं तदौकितंयानपात्रमारुरोहप्रियासखः त
तोध्वौयानपात्रेणतेनयात्यत्रयातिसः व्यग्रःसागरवीरेणदिनानिकतिचिद्वणिक् एकस्मिन्दिवसेतावज्जलद्विद्यु
ल्लोचनः उग्रःसंहारभयदःकालोमेघउपाययौ सस्थूलचर्यधारेणबलिनावायुनाहतं ततोमज्जितुमारे-
भेयानपात्रंतदूर्मिषु मुक्ताक्रंदेपरिजनेमनोरथइवस्वके: मज्जमानेप्रवहणेकक्षाबद्धोत्तरीयकः वणिग्हिरण्य
गुप्तोसोदृष्ट्वानंगप्रभामुखं हाप्रियेक्कत्वमित्युक्त्वाचिक्षेपात्मानमंबुधौ गत्वाचवीचिविक्षेपात्कांश्चित्प्रापसदैवतः।

वृ०त्के०९८
१८

वणिक्प्रवहणमेकांतां चालंब्यासरोहसः साप्यनंगप्रभा रज्जोबद्धे फलहकोत्करे तेन सागरवीरेण रूढेत्येवाध्यरोह
तः स्वयं वारुह्यत तत्रैव भीतामाश्वासयन्स तां प्लवमानो ययावब्धौ बाहुभ्यां वारि विक्षिपन् क्षणात्प्रवहणे लग्ने नष्टा
18 भे३ भ्रमं वन्नमग्नः साधोप्रशांतकोपस्य तुल्योभूस्तिमितोंबुधिः स चारूढः प्रवहणं पंचाहेनानिलेरितः हिरण्यगुप्तः प्रा
पाब्धिकूलं दैवाद्वणिक्ततः अननीर्ष्यंतटं सोथ प्रियाविरहदुःखितः अशक्यप्रतिकारं च मत्वा विधिविचेष्टितं ग
त्वाशनैः स नगरं बध्मधाराशयोध्यति हिरण्यगुप्तो भूयोर्थमुपार्ज्यास्ते स निर्वृतः सा त्वनंगप्रभैकाहश्चित्रं फलहका
कास्थिता तेन सागरवीरेण प्रापिताम्भोनिधेस्तटं तत्राश्वास्य च नीताभूद्वीवरेण तेन सा तत्सागरपुरं नाम नग
रं भवनं निजं तत्र राजसमश्रीकं वीरं प्राणप्रदायिनं सुयौवनं सुरूपं च विचिंत्याज्ञाविधायिनं तमेव चक्रे सा
नंगप्रभा दाशपतिं पतिं न स्त्री चलितचारित्रा निम्नोन्नतमवेक्षते ततः कैवर्तपतिना तेन साकं मुवास सा त
द्वेश्मन्युपभुंजाना तत्समृद्धिं तदर्पितां एकदा सा प्रहर्म्यायादपश्यड्ध्ययातयाः यांतं विजयवर्माख्यमभ्यंक्ष
त्रियपुंगवं रूपलुब्धावतीर्य्यैव तमुवेत्यब्रगादसाः दर्पीनात्तेष्टचित्तां मां भज प्राणयिनीमिति स वाभिनंद्यह
ष्टस्तामाकाशपतितामिव गृहीत्वा निजगाम स्वं गृहं त्रैलोक्यसुंदरी सोथ सागरवीरस्तां बुध्वाक्वापि गतां प्रियां
त्यक्त्वा सर्वतनुं त्यक्तुं तपसा सुरनिम्नगां ययागात्तत्कथं माभूद्दुःखं तस्य तथाविधं करास्सवंकृता दृश्या विद्याधर्या राम १८

दिसंगमः साचानंगप्रभातेनसमं विजयवर्म्मणाः तस्थौतत्रैवनगरेयथासुखमनर्गला: ततःकदाचित्तत्रत्य:
समारूढःकरेणुकः राजासागरदत्ताख्योनिरगाद्भ्रमितुंपुरं स्वनामसंज्ञंसुकृतंसपश्यंस्तत्पुरंनृपः तेनाययौयथा
तत्रगृहंविजयवर्म्मणः बुध्वाचन्द्रपमायांतंतद्दर्शनकुतूहलात् आरुरोहात्रसानंगप्रभाहर्म्यतलात्तदा: दृ
ष्ट्वैवसातंराजानंतथाभूतदशायया हृताद्राजाकरेणुस्कंहस्त्यारोहमभाषत भोहस्त्यारोहनैवाहमारूढाजा
तुहस्तिनं तदारोहयमामत्रवीक्ष्येतावक्रियन्मुखं तद्बुध्वाघोरणोतस्मिन्राजाननविलोकिनी राजादर्शिता
मिंदोर्दिवःकांतिमिवच्युतां पिबंश्चतामनृप्तेनचकोरइवचक्षुषा नृपस्तत्प्राप्तिवद्धांख्योहस्त्यारोहमुवाचसः
नीत्वाकरेणुनिकटंप्रस्याप्यामनोरथं आरोपयेंदुवदनामेतामत्राविलंबितं इतिराज्ञोदितेतेनहस्त्यारोहेणाढौ
किता अधस्तात्तस्यहर्म्यस्यतत्रागांसाकरेणुका दृष्ट्वातांनिकटप्राप्तांराज्ञःसागरवर्म्मणः उत्संगेतस्यसानंगप्रभा
त्मानमपातयत् कादौसमभर्तृविद्वेषःक्वेषाभर्तृषदृमिता हातस्यापिचरशापेनदर्शितोतिविपर्ययः निपातभीते
वचसाकंठेतंनृपमग्रहीत् तस्यशीमृतसिक्तांगःसोपिप्राप:परांमुदं युक्त्यासमर्प्पितात्मानंपरिचुंबनलालसां तां
सराजागृहीत्वैवजगामाशुस्वमंदिरं तत्रतामुक्तवृत्तांतांतद्देवघ्युचांगतां सचकारमहादेवींप्रविश्यांतःपुरंनृपः
नुध्वाराजहृतामेतामत्यक्षत्रयुवाथसः बहिर्विजयवर्म्माञाराजमृत्पानयोधयत् युद्धेचतत्रतत्याजशरीरमय

वृ·कं·९
१५
19

राज्ञुवः नश्यताविषहं तेहि स्त्रीनिमित्तं पापाभवं किमेतयावराक्याते भजास्माने हि नं दिनं इतीव च सुतास्त्रीभिः सनीतो
भूत्सुतालयं साप्यनंगप्रभा तस्मिन्राज्ञि सागरवर्म्मणि नदीव सागरे स्थैर्यं बबंधानन्यगामिनी भवितव्यबलान्मेने
तेन पत्या त्तत्तार्थता सोपि जन्मफलं प्राप्तं तयामन्यत भार्यया दिनैश्च तस्या राज्ञी सा राज्ञः सागरवर्म्मणः दधे नंग
प्रभा गर्भं काले च सुषुवे सुतं नाम्ना समुद्रवर्म्माणं तं स राजा पिता शिशुं चकार विहितोदारपुत्रजन्ममहोत्सवं क्रम
मात्र वृद्धिमायातं तं सगुणं प्राप्तयौवनं यौवराज्येभिषिंचत्तं सुतं स भुजशालिनं विवाहहेतोस्तस्याथ सूनोः सागर
वर्म्मणः राज्ञः कमलवत्याख्यां सुतामाहारति स्म सः ततो स्वाहायत स्मै च पुत्राय यावर्जितो गुणैः समुद्रवर्म्मणे राज्यं
निजं धारा सभूपतिः सोपि प्राप्यैव तद्राज्यमोजस्वी क्षत्रधर्मवित् समुद्रवर्म्मा पितरं प्रणतस्तं व्यजिज्ञपत् अनु
जानीहि मां तात दिशो जेतुं व्रजाम्यहं अजिगीषुः पतिः भूमेर्निंद्यः क्लीवद्धवस्त्रिया धर्म्या कीर्त्तिकरा सा च लक्ष्मीरिह
महीभुजां या जित्वा परराष्ट्राणि निजाबाहुबलार्जिता किं तेषां तात राजत्वं क्षुद्राणामभिभूतये स्वप्रजामिव वादं
ति मार्जाराइव लोलुपा इत्युचिवांसं तेनोचे पित्रा सागरवर्म्मना नूतनं पुत्र राज्यं ते तत्तावत्त्वं प्रसाधय नास्त्यपुण्यम
कीर्त्तिर्वा प्रजा धर्मेण शासतः अनवेक्ष्य च शक्तिं स्वां युक्तो राज्ञां न विग्रहः वसयद्यपि शूरस्त्वं सैन्यमस्ति च ते बहु
तथापि नैव विश्वास्या जयश्रीश्चपला रणे इत्यादि पित्रा प्रोक्तोपि तमनुज्ञाप्य यत्नतः समुद्रवर्म्मा स ययौ तेजस्वी दि राम
१५

ग्जिगीषया क्रमेणाचदिशोजित्वास्थापयित्वावशंन्नृपान्‌ प्रापहस्त्यश्वहेमादिराशयोनगरंनिजं तत्रपित्रोर्महार्है
र्नानादेशोद्भवैश्चसः चरणौपूजयामासप्रणतःपरितुष्टयोः तदाज्ञयाचप्रददौब्राह्मणेभ्योमहायशाः महार्घ
नानिहस्त्यश्वहेमरत्नमयानिसः तथाचसुततोर्थिभ्योभ्यस्तेभ्यश्चववर्षसः एकोदरिद्रशब्दोत्रयथाभूदर्थवर्जि
तः तद्दृष्ट्वापुत्रमाहात्म्यमात्मनःतततत्पतौ राजासागरवर्मासोमेनेनंगप्रभायुतः उत्सवेनचनीत्वातान्यहा
न्निन्नृपतिःसतं पुत्रंसमुद्रवर्माणमवोचन्मंत्रिसंनिधौ यन्मयापुत्रकर्तव्यंतत्तंतदिहजन्मनि भुक्तंराज्यमुखंदृष्टःप
त्रचयत्तावभवः दृष्टस्त्वंप्राप्तसाम्राज्यःकिमन्यत्प्राप्यमस्तिते तदाश्रयाम्यहंतीर्थयावन्मेध्रियतेतनुः विनश्वरेश
रीरेस्मिन्किमद्यापिगृहेतवः इतीवैषाजरापश्यकर्णमूलेब्रवीतिमे इत्युक्त्वाससुतेनेच्छतापितस्मिन्नृपःततो ययौ
सागरवर्मायप्रयागंप्रियययासहः तमनुव्रज्यपितरंसचागत्यनिजंपुरं समुद्रवर्मास्वंराज्यंयथाविधिशशासत
त् राजासागरवर्मापिसोनंगप्रभयान्वितः प्रयागेतपसादेवंवृषध्वजमतोषयत्‌ सस्वप्नेतमुवाचेदंत्रिपुरारि
र्निशाक्षये तुष्टोस्मितेसभार्यस्यतपसातदिदंशृणु एषानंगप्रभाचत्वंयुवांविद्याधरावुभौ शापक्षयान्निजंल
लोकंप्रातःपुनरागमिष्यथः तच्छ्रुत्वाससप्रबुबुधेराजानंगप्रभायसा तद्वदालोकितस्वप्नातच्चान्योन्यमथोचतुः
ततश्चनृपतिंतंसाहृष्टानंगप्रभाभ्यधात्‌ आर्यपुत्रमयाजातिस्तच्छास्मियास्मृताधुना अहंविद्याधरेंद्रस्यस

मरस्यात्मसंभवा एषानंगप्रभानाम पुरे वीरपुराभिधे पितृशापादिहागत्य विद्याभ्रंशेन मानुषी भूत्वा विद्याधरी साकं
साहं स्मरामात्मनः इदानीं च प्रबुद्धाहमिति यावच्च वक्ति सा तावत्सावततारात्र तत्पिता समरो दिवः नमस्तं ततः सते
नाथराज्ञा सागरवर्म्मणाः उवाच पादपतितां तामनंगप्रभां सुता एहि पुत्रि गृहाणेता विद्याः शापश्च ते त्यतः त्वया-
ष्ट जन्मदुःखं हि भुक्तमेकत्र जन्मनि इत्युक्त्वोसंगमारोप्य विद्यास्तस्यै पुनर्ददौ ततसागरवर्माणां राजानं तम भाष-
तः भवान्विद्याधराधीशो मदनप्रभसंज्ञकः अहं च समरो नाम सुतानंगप्रभा मम प्रदेया पूर्वमेषा च वरैस्तैस्तैरया
च्यतः न च तेषां कमप्यैच्छद्भर्त्तारं रूपगर्विता ततस्तुल्यगुणो नैषा त्वयाप्युक्ते न याचिता विधियोगाच्च न तदा त्वमंप्य
गीत्ततो मया मर्त्यलोकागमाय स्यास्तेन शापमदामहं भूयाथ मर्त्यलोके पि भार्येयमिति रागिणाः संकल्पहर
